# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – आचार्य – १ | प्रश्नपत्रम् – ४ | गुणाः – ५० |
| विषयः – पुराणेतिहासः | सत्रम् – २ | समयः – २ तः ४ |
| दिनाङ्कः – १६/०७/२०२१ | सन्दर्भग्रन्थः – श्रीमद्भागवतमहापुराणं दशमस्कन्धः उत्तरार्धः | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ लब्ध्वा जनो दुर्लभमत्र मानुषं कथञ्चिदव्यङ्गमयत्नतोऽनघ।
पादारविन्दं न भजत्यसन्मतिर्गृहान्धकूपे पतितो यथा पशुः॥

२ सन्तुष्टो यर्हि वर्तेत ब्राह्मणो येन केनचित्।
अहीयमानः स्वाद्धर्मात् स ह्यस्याखिलकामधुक्॥

३ नमः पङ्कजनाभाय नमः पङ्कजमालिने।
नमः पङ्कजनेत्राय नमस्ते पङ्कजाङ्घ्रये॥

४ एतदर्थोऽवतारोऽयं भूभारहरणाय मे।
संरक्षणाय साधूनां कृतोऽन्येषां वधाय च॥

**प्रश्नः २** रुक्मिणीहरणकथाप्रसङ्गं सरलसंस्कृते वर्णयत।

**प्रश्नः ३** कालयवनस्य कालकवलीभवनं मुचुकुन्दकथां च वर्णयत।

**प्रश्नः ४** उषा-अनिरुद्धयोः मेलनं चर्चयत।

**प्रश्नः ५** भगवता श्रीकृष्णेन कृतं बाणासुरयुद्धं समीक्षत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ कृष्णाय वासुदेवाय हरये परमात्मने।
प्रणतक्लेशनाशाय गोविन्दाय नमो नमः॥

२ युद्धं नो देहि राजेन्द्र द्वन्द्वशो यदि मन्यसे।
युद्धार्थिनो वयं प्राप्ता राजन्या नान्नकाङ्क्षिणः॥

३ त्वत्पादुके अविरतं परि ये चरन्ति ध्यायन्त्यभद्रनशने शुचयो गृणन्ति ।
विन्दन्ति ते कमलनाभ भवापवर्गमाशासते यदि त आशिष ईश नान्ये ॥

४ ऋषीणां पितृदेवानां सुहृदामपि नः प्रभो ।
सर्वेषामपि भूतानामीप्सितः क्रतुराडयम् ॥

**प्रश्नः ७** भगवतः श्रीकृष्णस्य इन्द्रप्रस्थगमनं वर्णयत ।

**प्रश्नः ८** भगवतः श्रीकृष्णस्याग्रपूजां शिशुपालोद्धारं च प्रतिपादयत ।

**प्रश्नः ९** श्रीकृष्णेन कृतं सुदाम्नः स्वागतम् ।

**प्रश्नः १०** भगवतः श्रीकृष्णस्य लीलाविहारं वर्णयत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ कंसमहिष्योः नाम किमासीत् ?
२ जरासन्धः कस्य देशस्य भूपासीत् ?
३ अयादवीं महीं कर्तुं कः निश्चयमकरोत् ?
४ कस्य देहजेनाग्निना कालयवनः भस्मतां गतः ?
५ आनकदुन्दुभीति कस्यापरं नाम ?
६ रैवतः कस्य देशस्याधिपतिः आसीत् ?
७ बलरामस्य पत्न्याः नाम किमासीत् ?
८ विदर्भदेशराजकन्या अर्थात् का ?
९ रुक्मिणीपत्रे कति श्लोकाः प्रोक्ताः ?
१० चेदिनरेशः कः ?
११ दारुकः कस्य सारथिः आसीत् ?
१२ कुण्डिनं न प्रवेक्ष्यामीति कः प्रतिज्ञां कुरुते ?
१३ सत्यभामा कस्य पुत्र्यासीत् ?
१४ सूर्यः स्यमन्तकमणिं कस्मै ददौ ?
१५ अनिरुद्धः कस्य तनयाम् उपयेमे ?

****